दिनाङ्क : 14/11/2025 सायम् - 06:20

## मुख्यवार्ता:

बिहारविधानसभानिर्वाचनाय सर्वेषां त्रिचत्वारिंशोत्तर द्विशतं यावत् विधानसभाक्षेत्राणां कृते मतानां गणना शान्तिपूर्वकं प्रचलति। सत्तारूढ-एन्. डी. ए. इति राष्ट्रिय-जनतान्त्रिक-गठबंधनं प्रचण्ड-विजयस्य दिशायाम् अस्ति।

भाजपा-दलस्य प्रत्याशि तथा उपमुख्यमन्त्री सम्राट् चौधरी तारापुर-आसनम् विजितवान्, राघोपुर आसने, महाघटबन्धन्-पक्षस्य मुख्यमन्त्रीपदस्य प्रत्याशि, आर्. जे. डी. दलस्य नेता च तेजस्वी प्रसाद यादवः विजितवान्।

भाजपेति दलस्य वरिष्ठः नेता तथा प्रधानमन्त्री नरेन्द्रमोदी, भाजपाध्यक्षः जगत् प्रकाश् नड्डाः,दलस्य वरिष्ठः नेता अमितशाहः च बिहारस्य जनान् ऐतिहासिकाभूतपूर्वाय च जनादेशाय धन्यवादं दत्तवन्तः।

क्रिकेट्-क्रीडायां, कोलकाता-नगरस्य ईडन्-गार्डन्स् क्रीडाङ्गणे दक्षिण-आफ्रिका-विरुद्धस्य प्रथम-निकष-क्रीडायाः प्रथम-दिने भारतस्य आधिपत्यं वर्तते।

## बिहार-मतगणना

बिहारविधानसभानिर्वाचनाय सर्वेषां त्रिचत्वारिंशोत्तर द्विशतं यावत् विधानसभाक्षेत्राणां कृते मतानां गणना शान्तिपूर्वकं प्रचलति। अंतिम सूचना प्राप्तिं यावत् उपलभ्यमानानि परिणामानि, सूचयन्ति यत् सत्तारूढ-एन्. डी. ए. इति राष्ट्रिय-जनतान्त्रिक-गठबंधनं प्रचण्ड-विजयस्य दिशायाम् अस्ति। एन्. डी. ए. पक्षः षड्सप्तति आसनानि जित्वा अष्टाविंशत्यधिकैकासनेषु अग्रे अस्ति। आर्. जे. डी. दलस्य नेतृत्वे महाघटबन्धनं केवलं अष्ट आसनानि जित्वा पंचविंशति आसनेषु अग्रेऽस्ति। अन्यैः त्रीणि आसनानि विजित्य त्रीणि-आसनेषु अग्रे सन्ति। सर्वेषां त्रिचत्वारिंशोत्तर द्विशतासनानां कृते उपलभ्यमानानां नवीनतम-प्रवृत्तेः अनुसारं-भाजपेति-दलं एकचत्वारिंशत् आसनानि जित्वा एकपंचाशत् आसनेषु अग्रे अस्ति, जे. डी. यू-दलं त्रयोविंशति आसनानि जित्वा एकषष्ठी आसनेषु अग्रे अस्ति, एल्. जे. पी. दलं चत्वारि आसनानि जित्वा पंचदश-आसनेषु अग्रे अस्ति, एच्. ए. एम्. दलं एकम् आसनं जित्वा चतुर्षु आसनेषु अग्रे अस्ति, आर्. एल्. एम्. दलं चत्वारि आसनेषु अग्रे अस्ति। आर. जे. डी. षट् आसनानि जित्वा ऊनविंशति आसनेषु अग्रे अस्ति, काङ्ग्रेस्-दलं एकम् आसनं जित्वा चतुर्षु आसनेषु अग्रे अस्ति। ए. आई. एम्. आई. एम्. दलं त्रीणि आसनानि जित्वा द्वयोः आसनेयोः अग्रे अस्ति।

राघोपुर आसने, महाघटबन्धन्-पक्षस्य मुख्यमन्त्रीपदस्य प्रत्याशि, आर्. जे. डी. दलस्य नेता च तेजस्वी प्रसाद यादवः विजितवान्। जन-शक्ति-जनता-दलस्य नेता तस्य भ्राता च तेज-प्रताप-यादवः महुआ-क्षेत्रात् एल्. जे. पी. तथा आर्. जे. डी. दलस्य प्रत्याशिनः पश्चात् तृतीयस्थाने अस्ति। भाजपा-दलस्य प्रत्याशि तथा उपमुख्यमन्त्री सम्राट् चौधरी तारापुर-आसनम् विजितवान्, विजयकुमारसिन्हा लखिसराय्-आसनात् अग्रे अस्ति।

अलीनगर-क्षेत्रे भाजपेति दलस्य मैथिली-ठाकुरः विजितवती, भाजपेति-दलस्य वरिष्ठः नेता मङ्गलपाण्डे च सिवान-क्षेत्रे अग्रे अस्ति।

तत्रैव सप्त-राज्यानाम् अष्टसु निर्वाचनक्षेत्रेषु आयोजितेषु विधानसभायाः उप-निर्वाचने काङ्ग्रेस्-दलं द्वे आसने विजितवान्, भाजपेति दलम् एकं आसनं जित्वा एकस्मिन् आसने अग्रे अस्ति। आम आदमी-दलं, पी. डी. पी., मिजो-नैशनल-फ़्रण्ट् इत्येतत् दलं च एकं एकं स्थानं प्राप्तवन्तः, जे. एम्. एम्. एकस्मिन् आसने अग्रे अस्ति।

भाजपेति दलस्य वरिष्ठः नेता तथा प्रधानमन्त्री नरेन्द्रमोदी, भाजपाध्यक्षः जगत-प्रकाश नड्डाः,दलस्य वरिष्ठः नेता अमितशाहः च बिहारस्य जनान् ऐतिहासिकाभूतपूर्वाय च जनादेशाय धन्यवादं दत्तवन्तः।

## राष्ट्रपति - बालदिवस

राष्ट्रपतिः द्रौपदी मुर्मु वर्या अद्य बालदिवसस्य अवसरे राष्ट्रपतिभवनस्य सांस्कृतिक-केन्द्रे विविध-विद्यालयानां संघटनानां च बालकैः सह संवादं कृतवती। सामाजिकान्तर्जालीय सन्देशे राष्ट्रपतिः अवदत् यत् बालाः राष्ट्रस्य भविष्याः सन्ति, तान् आत्मविश्वासयुक्ताः उत्तरदायिनः च नागरिकाः कर्तुं प्रयत्नाः करणीयाः। राष्ट्रपतिः बालकैः सह व्यतीतानि आनन्दपूर्णानि क्षणानि प्रसारितवती, तेषु केचन वंदे मातरम् गीतं गीतवन्तः, काव्यानि पठितवन्तः च।

## उपराष्ट्रपतिः

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् वर्यः अद्य आन्ध्रप्रदेशस्य विशाखापत्तनम-नगरे पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य त्रिंशत्तमं सि. आई. आई. सहभागित्व-शिखरसम्मेलनम् उद्घाटितवान्। अस्मिन् अवसरे उप-राष्ट्रपतिः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतं द्रुतगत्या समृद्धराष्ट्ररूपेण उद्भूतम् अस्ति इति। आन्ध्रप्रदेशं भारतस्य सर्वोत्तम-निवेश-स्थानेषु अन्यतमम् इति प्रवदन्, सः अवदत् यत् केन्द्र-राज्यं च उभौ सामञ्जस्येन कार्यं कुर्वन्तः सुदृढानि लक्ष्यानि च प्राप्तवन्तौ इति।

### प्रधानमन्त्री-गुजरात यात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः गुजरातराज्यस्य यात्रायां भविष्यति। यात्रावधौ श्रीमोदी सूरत-नगरे निर्माणाधीनं बुलॅट्-रेल्-स्थानकं गत्वा मुम्बई-अहमदाबाद् द्रुत-रेल-मार्गस्य प्रगत्याः समीक्षां करिष्यति। पश्चात् प्रधानमन्त्री नर्मदा-मण्डलस्य देवमोगरा-मन्दिरे पूजार्चनां च करिष्यति। सः डेडियापाड़ा अपि गमिष्यति तथा च धरती आबा भगवान् बिरसा मुण्डा वर्यस्य सार्धैकशततमस्य जन्मदिवसस्य अवसरे आयोजिते कार्यक्रमे भागमपि ग्रहीष्यति।

### मनसुख-गुजरात

गुजरातराज्यस्य द्विदिवसीय यात्रायां केन्द्रीयमन्त्री डा. मनसुख-माण्डवीयः अद्य राजकोट-पोरबन्दर-नगरयोः मध्ये राजकोट-रेलस्थानकात् विशिष्टं रेलयानं हरितध्वजं प्रदर्शितवान्। श्रीमाण्डवीयः अवदत् यत्, राजकोट-पोरबन्दरयोः मध्ये नूतनयोः स्थानीय-रेलयानयोः आरम्भेन सौराष्ट्र-प्रदेशस्य विकासाय इतोप्यधिकं प्रोत्साहनं प्राप्स्यते।

### जयशङ्करः - कनाडा

विदेश मन्त्री जयशङ्करः कनाडादेशे जी7 विदेशमन्त्रिणाम् उपवेशने भागम् अभजत्, सः तत्र विश्वस्य अनेकैः विदेशमन्त्रिभिः सह मिलितवान्। प्रमुख-औद्योगिकीकृत-लोकतन्त्रानां समूहस्य जी-7 इत्यस्य अध्यक्षः कनाडा-देशः, सहभागिरूपेण भागं ग्रहणाय भारतं आमन्त्रितवान् आसीत्। श्रीजयशङ्करः कनाडादेशस्य विदेशमन्त्रिणा अनीता आनन्देन सह मिलित्वा अवदत् यत् ते द्वयोः देशयोः मध्ये सम्बन्धाय पञ्चविंशत्यधिक द्विसहस्र तमवर्षस्य नुतनस्य मार्गचित्रस्य कार्यान्वयने प्रगत्याः प्रशंसितवन्तौ। नियाग्रायां द्विदिवसीयसम्मेळनावधौ, मन्त्री तत्र उपस्थितैः मन्त्रिभिः सह कूटनीतिक वार्तां आचरितवान्। सः अमेरिकादेशस्य विदेशसचिवेन मार्को रुबियो इत्यनेन सहापि मिलितवान् ।

### क्रिकेट

क्रिकेट्-क्रीडायां, कोलकाता-नगरस्य ईडन्-गार्डन्स् क्रीडाङ्गणे दक्षिण-आफ़्रिका-विरुद्धस्य प्रथम-निकष-क्रीडायाः प्रथम-दिने भारतस्य आधिपत्यं वर्तते।

।। इति वार्ताः ।।